तत्र विशेषो ग्रहणे। सूर्याय ज्योतिष्मते जुष्टं। प्रोक्षणे। सूर्याय ज्योतिष्मते त्वा जुष्टं। सूर्यं ज्योतिष्मंतं गच्छ। सूर्याय ज्योतिष्मते नु ब्रूहि। सूर्यं ज्योतिष्मंतं यज। प्राशित्रादि सर्वं॥ अन्वाहार्यो दक्षिणा। सूर्यस्य ज्योतिष्मत उज्जितिं। सूर्यो ज्योतिष्मांस्तमपनुदत्विति॥ ॥ अत्र होत्रं। सप्तदश सामिधेन्यः। सूर्यं ज्योतिष्मंतमावह स्वाहा। सूर्यं ज्योतिष्मंतं स्वाहा देवा। वार्त्रघ्नौ। प्रधान यागे। तरणिर्विश्वदर्शत इति पुरोनुवाक्या॥ येयजामहे सूर्यं ज्योतिष्मंतं बभ्रुः सूर्यश्रवसा महानि तिया ज्या। प्राकृतः स्विष्टकृत्॥ अथवा केवला वैश्वदेव्याहुतिरेव भवति॥ स्वशाखोक्ता। न सूर्याय ज्योतिष्मत इष्टिः। ततस्त द्विहार एव शांतरग्निहोत्र होमः॥ आश्वलायन ब्राह्मणो नदाहुर्यस्याग्निमनुद्धृतमादित्यो भ्युदियाद स्तमियाद्वाप्रणीतो वा प्राग्धोमादुपशाम्येत्का तत्र प्रायश्चित्तिरिति हिरण्यं पुरस्कृत्य सायमुद्धरेज्ज्योतिर्वै शुक्रं हिरण्यं ज्योतिः शुक्रमसौ तद्देवता। ज्योतिः शुक्रं पश्यन्नुद्धरतीति। रजतमंतर्धाय प्रातरुद्धरेत्। एतद्वा अस्य रूपं पुरा संभेदाच्छाया नामाहवनीयमुद्धरेदिति। तेनोद्धृतस्योपशमे पुनरुद्धरणं पिंडा रवांतरीयं पुरस्ताद्दजनं हिरण्यधारणं भवत्येवाहवनीयोद्धरणानंतरं उभयोर्गार्हपत्याहवनीययोरनुगमनं प्रागस्तमयाद्वा ज्ञायते तदा गार्हपत्यं मथित्वाध्वर्युर्बहुत्वा न स्त

मितेऽनुदिते वा पुनर्द्वैकेस्य होमः कार्यः। मथ्यमानस्य जननासंभवे चर्येम दूरास्परा पश्येदित्यादिनोपायेन गार्ह
पत्यस्त्वा नैर्लोकिकाग्न्यादिकं स्थापयित्वाऽनस्तमितानुदितयोरेव तस्माद्दाहवनीयमुद्धृत्य जुहुयात्। एतयोरुभ
ययोर्मध्ये यदि एकोपि न कृतः॥ ॥उभयोरनुगमनज्ञानोत्तरकाले सूर्यस्यास्तमयोभ्युदयो वा यदि भवति तदा पुन
राधेयं प्रायश्चित्तं भवति। एतस्याग्न्योरनुगमनज्ञानानंतरमस्तमयोदये सति भवति नास्तमयोदयानंतरमग्न्यो
रनुगमनपरिज्ञाने। तथा च मंडनः। उभयोर्नाशविज्ञानादूर्ध्वमर्कोस्तमेति चेत्। कर्कोग्निनाशमाचष्टे पश्चात्तत्
ज्ञातेपि नेच्छति। अग्निहोत्रार्थमुद्धृतेषु वेतत्प्रायश्चित्तं नेष्टिपशुसोमाद्यर्थमुद्धृतेषु तत्थैव शास्त्रांतरे श्रवणात्।
तथा च त्रिकांडमंडनः। अन्वाहितेभयध्वंसेप्यग्निनाशो न विद्यते। आन्वाहितविधिः कार्यो हव्यवाहद्वयेष्टि यगि
ति॥ ॥आश्वलायनब्राह्मणे। यस्य सर्व एवाग्नयेऽपशाम्येरन्का तत्र प्रायश्चित्तिरिति सोग्नये तपस्वते जनद्वते पा
वकवतेऽष्टाकपालं पुरोडाशं निर्वपेत्तस्य याज्यानुवाक्ये आ या हि तपसा जनेष्वा नो या हि तपसा जनेष्वित्याहुतिं वाह
वनीयेग्नये तपस्वते जनद्वते पावकवते स्वाहेति। एकस्याहवनीयस्यानुगमने ज्ञाते उभयेष्वस्तमये चेध्वनेनाद्व

ह्वे॰२५ रणादि भवति। एकस्य गार्हपत्यस्यानुगमने आहवनीयजागरणे वेत्यादि। उभयोर्युगपदनुगमने ज्ञानानंतरं मु
१५ दये ऽस्तमये च पुनराधेयं भवति। तत्रापि केचित्पुनराधेयं वा पुनराधानं वेति विकल्पमाहुः केचित्पुनराधेयमेव
ति निर्द्धारणं कुर्वंति। उदयास्तमयात्प्रागाहवनीयस्यानुगमे चाध्वर्यव पूर्वकं गार्हपत्यादुद्धरणं। ततऊर्ध्वमपि हो
मारंभात्प्रागेवमेव। कूर्चासादनोत्तरकाले प्राग्धोमादग्निहोत्र श्रमन्व पुचेत्यादि। पूर्वाहुतेरनंतरं पूर्वाहुति हुता
यां चेदित्यादि पक्षत्रये। उत्तराहुतिं ऊर्ध्वमप्येवमेवान्यस्यानुक्तत्वात्। दक्षिणाग्नेरप्येवमेव॥ पुनराधेयेध्मव
र्जं समानन्यायात्॥ ॥अथ पुनराधेयस्य पदार्थक्रमोत्तिरव्यते। उभयानुगमननिमित्ते पूर्वं दक्षिणाग्ने कृत्स्न
र्ग। एतन्निमित्तं पुनराधेयमहं करिष्ये तत्र मे त्वमित्यृत्विग्वरणं। नाग्न्यगारकरणं विद्यमानत्वात्। वपनं वा। अ
हतक्षौमपरिधानं पत्नीयजमानयोः। गार्हपत्यस्थाने ऽंबरीषाद्यग्निस्थापने॥ देवाः पितर इति जपः। पूर्वद्वारेण
यजमानस्य प्रवेशने। दक्षिणेन पत्न्याः स्थापितस्याग्नेः पश्चादुभयोरुपवेशनं। अरणिप्रदानाभावः। गार्हपत्या ॥१५॥
गारे ऽजबधने वा॥ चातुष्प्राश्यं पचा। अग्न्युपशमने। वाचंपछ निषेधः। गार्हपत्यादीनामायतनसंस्कारः। पक्षेसम

भाराः।संभारेभ्यः प्राक्श्रौतोल्लेखनांते अर्कपर्णाभ्यां कपालस्थानीयाभ्यां लौकिकाग्निश्रृतस्य व्रीहिमयापू
पस्य गार्हपत्यस्थाने स्थापनं। ततोन्वारब्धे श्रौताम्फक्षणादिशार्करांतं एवमाहवनीयस्थानेपि श्रौतोल्लेखना
नंतरं एवमपस्यापूपस्यार्कपर्णाभ्यां कपालस्थानीयाभ्यां लौकिकाग्निनाश्रृतस्य स्थापनं। ततोन्वारब्धे श्रौ
ताम्फक्षणादिशार्करांते। सभ्यस्थानेन संस्कारः।। सभ्यस्य विद्यमानत्वात्। * अश्वमानयेति प्रैषः। मथनं।
जातेवरदानं। अभिध्यासः। उद्धूतो न भवति। कुशैर्ज्वलतो गार्हपत्यस्य स्थापनं। सामगानं वा। इध्मस्यानेकु
शैरेव ज्वलद्भिरा हवनीयस्योद्धरणं। अश्वः पुरस्तादयतो गच्छति। यजमानस्य धूमानुगमनं। संभाराधिष्ठाप
नाद्याहवनीयाधानांते। इध्मस्य सर्वार्द्धान्वारंभणसार्प्यराज्ञीनां विकल्पः। दक्षिणाग्नेः स्थापनं। सभ्यस्य मथनं
स्थापनं च न भवति। नगांडीमध्मामिति प्रैषः। न धूतं। परीत्याश्वस्योत्सर्गः। पूर्णाहुतिः। अग्निहोत्रहोमः। तन्त्रह
विषांस्थाने एका अग्नेयी इष्टिः। अत्रोत्तमानुयाजवर्जमन्यत्सर्वमुपांशु भवति। पंचकपाल आग्नेयः पुरोडाशः। त
त्राग्नयेऽजुमित्यादि प्रकृतिवत्। विशेषः। प्रथमे प्रयाजे समिधोयजेत्यस्य स्थाने विकल्पेनाग्नीन्यजेति प्रैषः। नि

स्यमिति कर्कः। तत्र शां रवायनमतेसमिधोयजेत्येव। शतपथपक्षाश्रयेग्नीस्यन्यजेति। तदाचइदमग्निभ्यइतिप्रथ
मेत्यागः। तृतीयचा द्वितीयेचतुर्थयोरिदमग्नयइति। शां रवायनमतेप्रकृतिवत्यागः॥ द्वितीयादिप्रयाजेषुयजेत्येव।
उत्तमप्रयाजेइदमग्नयेपवमानायवाअग्नयइंदुमतेवाअग्नयेग्निभ्यआज्यपेभ्यइति॥ प्रथमेआज्यभागेअग्नयेनुब्रू
त्याग्निंयजेत्येवप्रैषौद्वितीयेअग्नयेपवमानायानुब्रूहि। अग्निंपवमानंयजेतिवा॥ अग्नयइंदुमतेनुब्रूहि। अग्निमिंदु
मंतंयजेतिवाइतिविकल्पद्वयं॥ ततोग्नयेनुब्रूहि। अग्निंयजेतिप्रधानयागे। ततः स्विष्टकृदादि प्राशित्रादिसर्वंभवति
दक्षिणायांहिर ण्यंदक्षिणा अनड्वान्वा॥ तच्चहिरण्यमसि। अनड्वानसीतिमंत्रेऊहः। प्रथमानुयाजेअग्नीन्यजे
तिप्रैषोदेवान्यजेतिवा। द्वितीयतृतीययोःप्रकृतिवत्। उत्तमोनुयाजऊर्ध्वैः। इदमग्निभ्यइतित्यागः। अग्नीन्यजेतिप्रै
षपक्षे। पक्षांतरेतुप्रकृतिवत्यागः। शेषंसर्वमुपांशु। ब्रह्मचर्यादयोनियमाभवंत्येव। तथाचकारिकायां। अन्यगारा
त्रानोच्छ्वासारणिहानविवर्जितं। सद्यः सर्वंभवेदेवंब्रह्मचर्यादियन्ततइति। ततस्तस्मिन्नेवविहारेग्निहोत्रादर्शद ॥१६॥
र्शमासेष्ट्यादिसर्वंभवति। उभयाग्न्यनुगमेइतरनिमित्तेपुनराधेयेविशेषः। पुनराधेयास्त्विकत्रिरात्रचतुरा

त्रपं चराऽऽग्नेयो गार्हपत्याहवनीयदक्षिणाग्नीनामुद्धृत्योत्सर्गः। अपूर्ववर्जितं पुनराधेयं सद्योऽग्नीनुत्सृज्याऽऽपूप
सहितं यथोक्तं पुनराधेयं कार्यं। संवत्सरं परार्द्धम् तत्र ह्याग्निर्भवनीत्यापस्तंबः। अथ होत्रं शतपथे दृष्टं। पंचदश सा
मिधेन्यः। आवाहने। अग्निमग्न आवह। अग्निं पवमानमावह। अग्निमिंदुमंतमितिवा।। अग्निमावह। अग्नीनाज्य
पाना३वह। अग्निं होत्रायेत्यादि।। प्रयाजेषु। ये ३ हे अग्न आज्यस्य व्यंतु ३ वौ ३ षगिति प्रथमे। ये ३ हे ग्निमाज्यस्य वेतु ३
वौषगिति द्वितीये। ये० हे ग्निनाऽऽथस्य व्यंतु ३ वौ ३ षगिति तृतीये। ये० हे ग्निराज्यस्य वेतु ३ वौषगिति चतुर्थे। ये० ३ हे स्वा
हाग्निं स्वाहाग्निं पवमानं अथवा स्वाहाग्निमिंदुमंतं। स्वाहाग्निं स्वाहाग्नीनाज्यपांजुषाणो अग्निराज्यस्य वेतु ३
वौषडिति पंचमे। अग्नये आज्यभागे। अग्निं स्तोमेन बोधय० दधोम। पुरोनुवाक्या। ये ३ हे ग्निं जुषाणो अग्निराज्य
स्य वेतु ३ वौषट्। द्वितीय आज्यभागे अग्निः पवमानो देवता। तत्र अग्न आयूंषि पवस० छुनामितिपुरोनुवाक्या। ये
३ हे ग्निं पवमानं जुषाणो अग्निः पवमान आज्यस्य वेतु ३ वौ ३ षट् कुर्यात्। अथवा द्वितीये आज्यभागे अग्निरिं
दुमान्देवता। तत्र एत्यू षु ब्रवाणि ते० दुंभो ३ पुरोनु० ३। ये ३ हे ग्निमिंदुमंतं जुषाणो अग्निरिंदुमानाज्यस्य वेतु ३ वौ०

स्व०॥
१७

प्रधानयागे। अग्निं तं मन्ये वो व० भरे ३ पुरोनुवाक्या। येय० ग्निं सो अग्नि० भरा वौषड् इति याज्या। स्विष्टकृति
॥ अग्ने तमद्याश्वं० ॐ हों भ इति पुरोनुवाक्या॥ ये ३ यजामहे ग्निं स्विष्टकृत्तमा याड् ग्निरग्नेः प्रिया धामान्ययाड् ग्नेः
पवमानस्य प्रिया०। अथ वा अयाडग्नेः इंदु मतः प्रियेति वा। अयाडग्नेः प्रिया धामान्ययाडग्नीनाज्यपामा प्रि
या धामानि पक्षदग्ने० हवि० आधात्याग्ने क्रु० भूथा ३ वौ ३ षट् कृ याज्या॥ अनुयाजेषु। अग्ने वसुवने वसुधेयस्य
वेतु ३ वौ ३ कइति प्रथमो॥ भूर्भुवः अग्नाउ वसुवने वसुधेयस्य वेतु ३ वौ ३ वसं गि ति द्वितीये॥ देवो ग्निः स्विष्टकृ
त्सुद्रविणेति प्रकृतिवत्। अंत्यमनुयाजउस्थैः। अन्यत्सर्वमुपांशु। सूक्तवाके। अग्निर्हविरजुष० कृत। अग्निः
पवमानो हविरजुषतावी० कृत। अथ वाग्निरिदं मान्हवीरजुषता० कृतो अग्निहवि० कृत। अग्नय आज्यपा आज्य
मजुषंता वीवृधंत महो ज्यायो कृत ०॥ अग्निहोत्रेणेत्यादि प्रकृतिवत्॥ शांखायनसूत्रगतो विशेषो लिख्यते॥
। त्रिषु च प्रयाजेष्वग्निशब्दो विकृतः॥ अग्निशब्दो विकृत इत्युक्ते नवैतु व्यं स्विति शब्दो विकृता वितितन्स्याप्या। ।।१७।।
प्रथमः प्रयाजः प्रकृतिवत्। द्वितीये। ये ३ यजामहे तनूनपादग्निमाज्यस्य वेतु ३ वौषट्। नराशंसो अग्निमिति नरा

शंसयाजिनां। तृतीयेये ३ हइलो अग्निमाज्यस्य वेंतू वौषट्। चतुर्थये ३ हे बर्हिरग्निराज्यस्यवेतू ३ षट्। पंचमः
पूर्ववत्। वार्त्रघ्नः पूर्वआज्येभागः। अग्निं स्तोमेन बोधय निवाग्नयेबुद्धिमते इति द्वितीयः। शतपथवत्प्रकार
द्वयं। अग्निर्मूर्द्धेति वारेतस्वतेइति तृतीयः प्रकारः। प्रधानयागे अग्नेनमद्धेति पुरोनुवाक्या। एभिर्नोअर्कैरितिया
ज्या। अथात्याग्नेइति स्विष्टकृतः पुरोनुवाक्या। अभिष्टेअद्येतेयाज्या। प्रथमेनुयाजेदेवंबर्हिरग्नेर्वसुवने। द्वितीयेदे
वोनराशंसोग्नावसुवने० तू वौषड्डिति। निगमेषुअग्नीनाज्यपानितिविशेषः। सूत्रकृताविहितोनास्ति। तेनप्रकृ
तिवद्देवदेवा० आज्यपानित्येवप्रयोज्यं। प्रयाजानुयाजादिस्थागाअपिप्रकृतिवद्देवाप्रेषोपिसमिधोयजादेवा
न्यजेत्येव। नाग्नीन्यजति। उपांशुत्वं वाध्वर्युवशान्दवतीतितद्वीयं शांखायनोक्तं नप्रदर्शितं। अन्यत्समानं।। ।।अ
थप्रसंगात्पुनराधेयनिमित्तानि लिख्यंते।। अग्नावनुगतेयस्य होमकालद्वयं व्रजेत्। उभयोर्विप्रवासे वा लौकि
कोग्निर्विधीयते।।१।। अनौविनाऽसमारूढेऽर्ध्वंशाम्यापरासनात्। ततोग्निर्लौकिकोज्ञेयः क्रतौसर्वत्रदर्शना
त्।।२।। कुरुक्षेत्रादितीर्थानां गमनेदेशविप्लुवे। समारोपंविनैवाग्नीन्नोद्धृत्य पुर्विपश्चितः। आरोप्याग्नीनरण्योः

तस्यानास्थानांतरं
तद्देशोद्धेशांतरं

द्वव्य्प स्यानुद्दर्वस्येत्सहाग्निभिः॥१॥ दृष्टोग्निर्यदि नश्येत मथ्यमानो हुताशनः। ग्रामात्सीमांतरं गच्छेत्र स्वस्थो हव्यवा
॥१८॥ हनः॥२॥ अहुतो वत्सरं गच्छेत्स्फ्रकेन शमेगतः। शिक्येनोद्वाहयेदग्नीन्पुनराधानमर्हति॥३॥ अग्निहोत्रेण रहितः
पंथानं शतयोजनं। आहिताग्निः प्रयायाच्चेदग्निहोत्रं वितन्यति॥४॥ अबं स्वयमजुह्वात्यो हावयेद्वा त्रिगादिनात
स्यस्यात्पुनराधेयं पवित्रेष्टिरथापि वा॥५॥ विहायाग्निं सभार्यश्चेत्सीमामुल्लंघ्य गच्छति। होमकालात्ययेन स्य पुन
राधानमिष्यते॥६॥ अरण्योः पुनाशाग्निं दाहेष्वग्निं समाहितः। पालयेदुपशांतेस्मिन्पुनराधानमिष्यते॥७॥ ज्येष्ठाचे
द्बहुभार्यस्य अतिचारेण गच्छति। पुनराधानमत्रैक इच्छंति न तु सूरयः॥८॥ दाहयित्वाग्निभिर्भार्यां सदृशीं पूर्वसंस्थि
तां॥ पात्रैश्चाथाग्निमादध्यात्कृतदारोऽविलंबितः॥९॥ दाहयित्वाऽग्निहोत्रेण स्त्रियं वृत्तवतीं पतिः। आहरेद्वि
धिवद्दारानग्नींश्चैवाविलंबयन्॥१०॥ जीवंत्यामपि ज्येष्ठायां द्वितीये परिणयने कृते। उत्सर्गे द्वाग्नीनुत्सृज्यान्या
यासह पुनरादध्यादिति स्मरंति चंद्रिकायां॥ भार्यायां विद्यमानायां द्वितीयामुद्वहेद्यदि। तदा वैवाहिकं कर्म कुर्या ॥१८॥
दावसथ्यग्निमान्॥११॥ उपघातः क्रियालोप उपेक्षा च प्रमादतः। चतुर्विधमिदं प्रोक्तं पुनराधानकारणं॥ ॥

प्रसिद्धकर्मणांलोपउपघातोंत्यजादिना।उपेक्षणंप्रवासादिप्रमादोचेरधारणं।।१२।।स्पृष्टोग्निर्यदिचांडालैःरुदक्या
दिभिरेववा।उपघातेषुसर्वेषुपुनस्त्वेतिसमिंधनं।।१३।।यजमानश्चपत्नीचउभौप्रवसितौयदि।आहोमान्तेग्नि
र्वर्तेत्पुनराधानमर्हति।।१४।।यद्धोमावप्यतिक्रम्यसीमांप्रत्यागतोपुनः।होमकालमतिक्रम्यतदानश्यंतिवन्हयः
।।१५।।विनाग्निभिर्यदापत्नीनदीसंबुधिगामिनी।अतिक्रामेत्तदाग्नीनांविनाशःस्यादितिश्रुतिः।।१६।।पत्न्यंतरेऽथ
वापत्न्यौहुताशनसमीपगे।तदापत्नीयथाकाममतिक्रामेन्नदीमपि।।१७।।पत्नीसीमामतिक्रांतायजमानोगृहे
यदि।आहोमाद्यःदिनागच्छेत्पुनराधानमर्हति।।१८।।एकाकिनीयदापत्नीर्वन्हीमाहायगच्छति।तत्रनाशोऽपरेत्याहु
र्भयात्घातेनदुष्यति।।१९।।रजोदोषसमुत्पन्नेमृतकेमृतकेपिवा।प्रवसन्त्यग्निमान्विप्रःपुनराधानमर्हति।।२०।।
बह्वीनामपिचैकस्यामुदक्यायांनतुव्रजेत्।एकादशेचतुर्थेन्हिगंतुमिच्छन्तिमित्ततः।।२१।।त्रयीमुक्त्वानुयोलोभा
त्प्रवसेत्सर्वसंधिषु।करोतिपुनराधानंप्रायश्चित्तमणाहुते।।२२।।नाग्निकार्यस्यवेलायांप्रवसेन्नचपर्वणि।नवि
नाथनिमित्तेनक्रीडाद्यर्थंतुनव्रजेत्।।२३।।नदीसंतरणेऽग्नीनांसीमातिक्रमणेतथा।सर्वत्राद्यंतसीम्नोर्वास्वामिस्य

देव०२५ ष्टास्फरग्नयः॥२६॥प्रत्यस्तमरणि द्वारे वाऽन्यथाग्निविनाशने। आत्मारंभणपक्षे तु नान्वारंभणमिष्यते॥२५॥त
॥१७॥ त्रेनान्वारभेदग्निं पुनराधिकृदाहृता। नत्वाप्यारंभणे किंचिच्छ्लोगाक्ष्यादिनिबंधनात्॥२५॥उदक्याचेन्द्रवेत्पत्नी प्रस्त
नाप्रत्रवसत्यपि। अन्वारंभविकल्पत्वात्पुनराधिर्न तन्मतात्॥२७॥ज्येष्ठान्वारभते वह्निं बहुभार्यस्य तेन राः। नकश्चैका
किनी पत्नी प्रयायादग्निभिः सह॥२८॥राष्ट्रभ्रंशादिसंप्राप्तावुचितं यानमीदृशं। अन्यथा हि प्रसवंत्या वन्हयो लोकि
काः खलु॥२७॥राष्ट्रभ्रंशादिगमने प्रासे देशोमनस्वती। तु हुत्वा च्चतुरा तेन स्मार्त्तेग्नौ सर्वसंततिं ते॥३०॥सायंप्रा
तर्हुनेत्सर्वमेवं स्याद्गमने न्वहं। यस्त्वऽग्न्याधेयमात्मार्थे कृतवान्मृतभार्यकः। पत्नी विरहितो वह्निं नयथाकामंस
निर्हरेत्॥३१॥होमहृत्यात्यये दर्शे पूर्णमासात्ययेनथा। पुनरेवाग्निमादध्यादिति भार्गवशासनं॥३२॥बहुधर्मवि
त्द्वेतोत्यग्निरावसथ्यात्कथंचन। यावदेकोपि तिष्ठेत्तावद्गन्यो न मथ्यते॥३३॥वैश्वदेवात्तथा होमात्पाकयज्ञेयं
नैव मेथुने। एकेनोत्तरितो वह्निरावसथ्यस्तु मथ्यते॥३४॥आवसथ्यानुकर्मार्थे योग्निरुद्ध्रियते क्वचित्। पूर्वे ॥१७॥
णयोजयित्वा तेन तस्मिन्होमो विधीयते॥३५॥चतुर्विंशतिमते। प्रातर्होमं तु निर्वर्त्य समुद्धृत्य हुताशनात्। शेषं

महानसे स्यात्तत्र पाकं समाचरेत् ॥ ३६ ॥ तमग्निं पुनराहृत्य शालाग्नावेव निक्षिपेत् । ततोऽस्मिन्वैश्वदेवा
दिकर्म कुर्यादिति तं द्विजः ॥ ३७ ॥ बह्वृचगृह्यकारिकायां ॥ नित्यपाकाय शालाग्नेरेकदेशस्य कार्यतः । पाकार्थमुल्मु
केऽहृत्वा तत्र पक्वा महानसे ॥ ३८ ॥ वैश्वदेवोऽन्यगारे स्यात्पाकार्थोऽग्निश्च लौकिकः । भूरिपाको भवेद्यत्र श्रा
द्धादावुत्सवेषु च ॥ ३९ ॥ कृतेऽपि वैश्वदेवे च लौकिको नैव कार्यतः । होमेनोत्तरिते केचिदाहुः सर्वत्र लौकिकं न
तत्समं जसेते बोमुपयद्धोमदर्शनात् ॥ ४० ॥ समासं चोल्मुकस्याहृत्यग्न्यगारे महानसात् । पाकान्ते वैश्वदेवात्म
कं नैतदप्युपपद्यते ॥ ४१ ॥ आहृते त्पुल्मुके पाकः शामित्रे दृश्यते पशौ । वचनाद्धत्वतिः सा तु लौकिकाग्नेर्या
स्तावन्मात्रापवर्गत ॥ ४३ ॥ पचनाग्नौ पचेदन्नं सूतके मृतकेऽपि वा । अपक्वातुवसेदग्निं पुनराधानमर्हति ॥ ४४ ॥
अरण्योरग्न्ध्ययोर्वापि नष्टयोः क्षपयोस्तथा । आहृत्य स्यान्ये समारोप्य पुनस्तत्रैव निर्मथेत् ॥ ४५ ॥ अरण्यो
रल्पमप्यंगं यावत्तिष्ठति पूर्वयोः । न तावत्पुनराधानमन्यारण्योर्विधीयते ॥ ४६ ॥ एवमेव योनिः पूर्वा कस्तु नरा
धानकर्मणि ॥ ४७ ॥ अथ तत्रैव निवसेद्ग्रामं गत्वा प्रमादतः । लौकिकाग्निः स विज्ञेयस्तस्याग्नेर्गमी श्रुतिः ॥ ४८ ॥

रेव०२५ भार्यायां प्रोषितायां चेदुद्देश्यकोऽस्ति मे तिवा ॥ तत्र स्यात्पुनराधेयमन्ये त्वाहुरिहान्यथा ॥५०॥ पत्न्यां प्रवासाविषये पुनरा
॥२७॥ धिरुदाहृतः । वाक्यैर्मुनीषिभिः प्रोक्तैरेकभार्यस्य शोभ्यते ॥५१॥ बहुभार्यस्य ज्येष्ठा चेत्प्रवसेत्पुनराहितिः । ज्येष्ठा चेद्दे
ग्निसंयुक्ता गच्छत्यन्याय धारुचि ॥५२॥ यजमानेन संहिता यद्यन्ता एव केवलाः ॥ एकस्यामप्यनिष्टं स्यामग्निहोत्रं
समिघतः ॥५३॥ पतिति श्रुति चेदग्निनाशो नेत्यपरे जगुः । यदा सीमामतिक्रम्य राष्ट्रोतत्रैव वर्त्तते ॥५४॥ अगृह
स्य प्रयाणं यत्प्रवास उच्यते बुधैः । यत्तु नारायणेनोक्तं ग्रामात् स्वाग्निसमन्वितात् ॥ गत्वा ग्रामान्तरे वासः प्रवासो
यमितीहशः ॥५५॥ ग्रामान्तरे न गंतव्यं विना पत्न्या वान्यत्र वा क्वचित् । सीमामतीत्य चेद्गच्छेत् वासः प्रवसनं स्मृतं ॥५६
प्रवसेद्दूनसंपत्त्यै न तीर्थाय कदाचन ॥ इति कूर्मपुराणोक्तं तथा बौद्धायने च ॥५७॥ सहाग्निवास पत्नीको गच्छ
तीर्थानि मानवः । पुराणवचनात्साग्नेः प्रवासोऽस्तीति केचन ॥५८॥ न कुर्युरग्न्युपस्थानं प्रवत्स्यतः स्वोपि यो
षितः । त्यागान्न प्रोषिताः कुर्युरश्नत्येव सधर्मके ॥५९॥ आगतो पस्थितिं वापि स्त्रीणां नेच्छंति सूरयः ॥ स ॥२०॥
गृहस्य प्रयाणं यत्तत्स्यात्स्याग्निसमन्विते ॥६०॥ क्लिष्टश्चेत्तत्र च स्वयं मनसा सह गच्छति ॥ अनस्यारोपये

दृग्नीन् स्तस्मात्राण्यपि नत्र च ॥ ६१ ॥ स्वांगेन वानयेदग्निं कात्यायनसनादयि । नयद्वा आह्लयास्तन्योजवे
नसह गच्छति ॥ ६२ ॥ प्रत्यक्षेण नयन्न्लेष (नष्टेपत्रिहरणेऽनलः) त्रिमुच्छ्वसेच्चैद्धि नश्यति । यदि वानुद्धृसन्नी
त्वा निधायायो भ्यस्यतं पुनः ॥ ६३ ॥ हरेदनुद्धृसन्नेव नष्टेपत्रिहरणेऽनलैः । शकटेनापि दूरं वा हरेद्देवां यथारु
ग चि ॥ ६४ ॥ स्वौं भेवा यवाशम्यापरासात्प्राड्न्यच्छसन् । कमर्थे हरणे प्रीनोनानुद्धृसा दिवो घते ॥ ६५ ॥ का
त्यायनमतात्के चिद्धृसंतो प्यतिदूरतः । प्रत्यक्षेण नयेत्सम्यग्निन् शकटेन विनापि तु ॥ ६६ ॥ आधानावसरे
जाते यद्वा धातु रुपंद्रवः । अरुद्धिर्नाम सा प्रोक्ता तत्र स्यात्सुनराहितिः ॥ ६७ ॥ उद्वाग्नौ ते विहारात्साक्ष
ध्यमाने प्यजल्मनि । लौकाग्न्याहावनि । क्षिते न्मुद्ये स्तसर्यपि वा ॥ ६८ ॥ विनष्टे हेतुना नेनजातवेदा विन
श्यति । विहारोत्तरकालेवा नष्टेपर्वपरो नलौ ॥ ६९ ॥ शोषे ष्टुर्वोरितं सर्वेत त्रा प्यग्निति विनश्यति । कार्ले
ल्पखेत्व निर्मथ्य लौकाग्न्यादौ क्षिपेद्यदि ॥ ७० ॥ उदयास्तमयात्पूर्वं ककर्मत्रानाशमिच्छति । लौकाग्न्यादाव
लब्धेपि पुरा कालस्तमयोदयात् ॥ ७१ ॥ मंथनारंभमात्रेनैण नाशो दृष्टैर्निवारितः । उभयोर्नाशविज्ञाना दूर्ध्वं

दैव॰२५ मर्कोस्तिमेति चेन्न॥७२॥ कर्कोग्निनाशमाचष्टे पश्चात् ज्ञाते पि नेच्छति। एकयोनित्वपक्षे तु सर्वाग्न्यनुगमो यदि॥७३
॥२१॥ उद्दयास्तमये तत्र नाशमेकेन तू नयोः॥ अथ चेदुभयोर्ह्नाने भुद्दयास्तमयस्तु रा॥७४॥ एकोग्निरेको जातश्चेत्तावतापि न
नश्यति। तदनुत्पत्तिमात्रेण स्यादग्न्याधिर्नसर्वथा॥७५॥ मंत्रैर्विना समारूढो रण्योरात्मनि वा यदि। तत्र लन शांतौस्या
द्दशमारूढशांतिवत॥७६॥ आरूढोपि यथाशास्त्रमथवरूढो न शास्त्रतः। तृतीये होमकालेय संप्राप्ते पुनराहितिः
॥७७॥ यदा तु लौकिकाग्न्यादि निधायहवनं तदा। हुते पि लौकिकाग्न्यादौ मथ्यमानोप्यनंतरं॥७८॥ द्वितीया द्वात्तनी
या द्वा होमकालात्सुरा यदि। अग्निर्न जायते तत्र पुनराधेयमाचरेत्॥७९॥ हुतेषु पक्षहोमेषु पक्षत्रयमनंतरं॥ कर्त
व्यं पुनराधेयं मथ्यमानो हुताशनः॥८०॥ दृष्टमात्रो नु गच्छेच्चेत्तत्र तस्य विनाशने। शतशो नुगमे चान्यं पुनर्निर्मथ्य जन
प्यते॥८१॥ नष्टे मथितमात्रे वा समारोपय जुर्जयन्। पुनर्निर्मथ्य जमस्वं यजु रूढूयावरोहणं॥८२॥ न लेन हेतुना वन्हि
रूपशांतोयदा भवेत्। कर्तव्यं पुनराधेयं यत्तत्पार्श्वे निरूपिते॥८३॥ नष्टे वपुनराधेयमग्न्यावनुगते सति। असमाप्या
य चेत्स्वामी सीमामुल्लंघ्य गच्छति॥८४॥ श्वभूकर रासभ काक शृगालैः कुक्कुटमर्कटश्च शूद्रैः॥ अंतेज्यपातकिभिः ॥२१॥
क्रुणयैर्वा। स्तूनिकया पि रजस्वलया वा॥८५॥ रेतोमूत्रपुरीषैर्वा पूयाश्रूश्लेष्मशोणितैः। दुष्टास्थिमांसमज्जाभिर

स्यैर्वापिजुगुप्सितैः ॥८६॥ आरोपितारणीस्पर्शकृतेऽग्नौस्पर्शनेपि वा ॥ आत्मारूढेषु मग्ने द्वावदेहापतितादिभिः
८७ ॥ अथवा योषितेनगच्छेद्दन्ततो काममोहितः । वर्तन्तेषु निमित्येषु केचिदग्निविनाशने ॥८८॥ नचारणिगतेवह्नौन
ष्टे स्यात्पुनराहितिः । इतरेषु निमित्ते ष्वग्न्याधेयं प्रचक्षते ॥८९॥ यद्वा सर्वोपघातेषु पुनस्त्वेति समिधनं ॥ द्रव्यस्था
ग्न्युपघातेषु द्रव्यशुद्धिः समिंधने ॥९०॥ समिंधनं पुनस्त्वादित्याकुर्या इति मंत्रेयास्मिद्दत्स्याप्यग्नेः पुनरिंधनप्रसे
वेणप्रदीप्ततरकरणं । आरोपितारणीचोभे एकावायदिनश्यति ॥ नचाग्न्याधेयमिच्छंति पुनराधेयमेव वा ॥९१॥
इत्यनारोपितारण्योः स्यपेन्नाहेनवे पुनः । नष्टलाभेयदोद्वायादत्र स्यात्पुनराहितः ॥९२॥ शूद्रोदक्यात्पकाकैश्च
पतितामेध्यरासभैः । अनारूढारणिस्पर्शेनिविहायान्यायोग्र्हेः ॥९३॥ नवतेंनः समेत्यप्सु मज्जयेत्तद्दूषिता
रणी । एकारण्येवदुष्टा चेत्तामेवाप्सु निमज्जयेत् ॥९४॥ तच्चाारणिलाभात्प्रागुद्धाते पुनराहितिः ॥ काष्ठसुध्या
विशोध्यैवा स्रजेत्त्वेषेति संतते । नष्टायामरुणौ यावदग्निरिष्टितिवेश्मनि । तावद्धोमादिकं कृत्वा तन्नाशे पुनरा
हरेत् । ९५ ॥ प्रागादित्योदयाद्धोमं स्कन्नं न होतिचेत् । अग्न्याधिः पुनराधिर्वा नोभयं स्यात्प्रसन्नियो ॥ ९६ ॥

दैव॰२९ नाशापहारावग्नीनां यद्वा स्फारणे यदि वा। कुर्यात्स्व पुनराधेयमिति बौधायनो ब्रवीत्॥९८॥ अत्रैतेषु निमित्तेषु
॥२२॥ नष्टानां पुनराहितिः। स्थितानुत्सृज्य चान्येषु पुनराधेयमिष्यते॥९९॥ अग्निहोत्रं च नित्येष्टिः पितृयज्ञ इति
त्रयं। कर्त्तव्यं प्रोषिते पत्यौ नान्यत्स्वामिक्रियान्विते॥१००॥ नैमित्तिकास्तु जाते ष्टिर्गृहदाहेष्टिपूर्विकाः। स्वाम्या
गमनपर्यन्तमुत्कृष्टव्यात्यशेषतः १०१॥ अग्न्याधेयादिकं प्राप्तमुभयानुगमादिना। स्वाम्यागमनपर्यन्तमुत्क
ष्टव्यमसंशयं॥१०२॥ मथित्वा पावकं सर्वं प्रायश्चित्तं विधाय च॥ मित्रायेत्यादिभिर्हुत्वा द्वादशानुगमाहुतीः
॥१०२॥ अग्निहोत्रं यथाकालं नित्येष्टिं च समाचरेत्। अस्वाम्यागमनातिष्ठेदागत्याथाददीत सः॥१०३॥ एवं केश
वसिद्धान्तात् प्रोषितस्याग्निषु क्रियाः। अवश्यंभाविनी मुक्त्काधुनावक्ष्ये मतान्तरं॥१०४॥ काम्याः क्रिया न कर्त्तव्याः
स्वामिनि प्रोषिते सति। नित्यनैमित्तिकीः कुर्यात्प्रावसत्यपि भर्त्तरि॥१०५॥ तत्रापि नैव कर्त्तव्याः क्रियाः सोत्तर
वेदिकाः। आधानपुनराधाने न स्तः पत्यौ प्रवासिनि॥१०६॥ उभयानुगमाहोतु प्राप्तेग्न्याधेयतः पुरा न किंचि ॥२२॥
दग्निहोत्रादिकर्त्तव्यमिति दर्शने॥१०७॥ रजोदोषैः समुत्पन्ने सूतके मृतकेपि वा। नित्यं नैमित्तिकं कुर्यात्।

२ आवेय

काम्यं कर्म न किंचन ॥१०८॥ आधाने पुनराधाने पशुः सौत्रामणी तथा। चातुर्मास्यानि सोमश्च तथैवाग्रयणक्रि
या ॥१०९॥ अकाम्यत्वेपि नैते स्युः सूतकादावनुष्ठितिः। प्रक्रान्ते ष्वपि चैते षु सूतकादिसमुद्भवे ॥११०॥ सूतकान्ते
वचैतानि वारितान्यपरे षतः। जातोपि वा विना भस्म स्पर्शजातजपविना ॥१११॥ प्रायश्चित्तं विना कार्यं मंथनेचो
दितं विना। लौकिकः स्यादतो लुप्तादारभ्यावर्त्तयेत्पुनः ॥११२॥ यदि नावर्त्तयेद्वह्निं होता दृश्ये च जुहोति च। हूयमानेपि
लुप्येत होमकालस्तु कार्यस्तं ॥११३॥ भस्मस्पर्शं विनाप्यके लौकिकत्वं न मन्त्रते। होमाष्टकाधिके लुप्ते धृतोप्यग्निर्वि
नश्यति ॥११४॥ धृतोल्पहोमलोपेपि यद्युद्वायो हि नश्यति। आधान पुनराधाने विकल्पेनात्र चोदिते ॥११५॥ लुप्त
होमद्वये प्राह लौगाक्षिरनलाहितिं। ज्वलत्स्वग्निषु कर्त्तव्या तं तु मस्येव केवला ॥१६॥ आपद्यग्निषु हीप्यत्सु मा मा
र्द्वचेन्न हूतये। सर्वहोमानतिक्रान्तान्यक्षांते पक्षहोमवत् ॥११७॥ समस्य तु हुयान्यश्चादिष्टिस्तं तु मतीं भवेत्। नत
त्र पुनराधेयमिति कौषीतकी श्रुतेः ॥११८॥ व० क्तरं खिल्स राईं वा होमलोपे मतांतरं ॥ आपत्काले न नश्यति हीप्यं
ते चेद्भुता त्रानाः ॥११९॥ पंचकार्याः पुरोडाशाहोमे लुप्ते र्द्धवत्सरे। पथिकृत्प्रथमोग्नेयः पावकः शुचिरेव च ॥११२०

हेव०२५ व्रतपतिस्तंतुमांश्चाभेदेवतागुणाः क्रमात्॥ स स कुर्यात्पुरोडाशान् होमे तु संवत्सरे॥१२३॥ पवमानः पावक
॥२३॥ श्चशुचिः पथिकृदित्यपि। वैश्वानरो व्रतपतिस्तंतुमानिति सप्तमं॥१२४॥ विशेषितोऽग्निरेवस्याद्देवतात्र यथाक्र
मं। एकारंभपरार्द्धांत विच्छेदेष्व विशेषनः॥१२५॥ पनस्वंनी व्रतयुतां नाऽऽधानमनलेऽसति। इयमापत्सुधारो सुमि
ति [illegible] रन्येमनस्वंती। अरण्योः क्षयनाशाग्निदेहे चाग्निं समाहितः
[illegible] नारण्यां विनश्यामन्ति चेदितरारणिः॥१२६॥ तां छित्वा
[illegible] पन। शक्केर्जंतुभिर्मथनेन वा॥१२७॥ स्यात्ताचेदरणी नूने मात्ये
[illegible] रणा। श्चामृते तु स्थितेदर्शेनि स्मिन्जीर्णारणि द्वये॥१२८॥ शाकल्की कृत्य पश्चात्सेवन्हौ नि क्षिप्य
दीपयेत्॥ ततो दक्षिणहस्तेनन्तू॰ तनामुत्तरारणि॥१२९॥ गृहीत्वा सव्यहस्तेन गृह्णीयादधरारणिं। तेऽउभे अर
णी तत्र होमेऽग्नौ धारयेत्तापेन॥१३०॥ उद्बुध्यस्वाग्ने प्रत्येनदयं ते योनिरित्यपि। उद्बुध्यस्वाग्ने प्रविश त्वयोनि
मन्यां देवयज्यायै वोढवे जातवेदः॥१३१॥ आरण्योररणी अनुसंक्रमस्वं जीर्णांतं तु मजीर्णया निर्णुदस्वेति २३

प्रथमो मंत्रः।संपनस्याहुतारंतस्यकमथित्वाग्निविन्हस्यच॥१३२॥विलाप्योत्पूयदर्भाभ्यांस्कंध्मदाय
चतुर्धतं॥जुहोत्याहवनीयेग्नौमनस्वेत्याहुतौतया॥१३३॥इष्टिंतंतुमंतीकुर्याच्छरावंदक्षिणांददेत्।वृत्तेमा
देशमात्रेतुशरावंनिगमोदितं॥इत्यनारोपितारण्योःक्षयन्नाग्न्येनवैपुनः॥१३४॥नहत्वाभेयदोहायेत्तदा
स्यापुनराहितिः॥कामोनिमित्तयोगेवापुनराधेयमिष्यते॥१३५॥निमित्तेषुयथायोगमाधानमपिवाभ
वेत्।तत्रयेषुनिमित्तेषुभ्रंशगयाहिकयाविधिः॥१३६॥तत्रैवपुनराधेयमन्यथाधानमिष्यते।अन्यत्राप्यप
रेप्राहुःपुनराधिर्विकल्पतः॥१३७॥यदित्तेजीवनायालंक्षुद्रंचास्येकवत्सरं।तन्नाशेपुत्रमत्यायांज्ञातीनामव
रोधने॥१३८॥अंगनाशेंगनानाशेपुनराधानमिष्यते।ज्यातिःसर्वस्वहानिःस्यात्स्पष्टमाध्येदितिश्रुतेः॥१३९॥
पुत्र्यान्वत्यानिकुर्वीरतश्रद्दधानोविमत्सरः।नत्वल्पदक्षिणैर्यज्ञैर्यजतेहकथंचन॥१४०॥इंद्रियाणियशःस्व
र्गमायुःकीर्तिंप्रजांपशून्।हंत्यल्पेनधनेनैवविप्रोनल्पधनोयजेत्॥१४१॥इतिपुनराधानपुनराधेययोर्नि
मित्तानि॥ ॥अधिकारेसत्यप्याधानाकरणे।कृतदारोगृहेज्येष्ठोयोनादध्याद्धुताशनं।चांद्रायणंचरेद्वर्षं

दे॰व॰२५ प्रतिमासमहोऽपि वा॥ वर्षातिक्रमे चांद्रायणं। मासातिक्रमे त्वहरुपवासः। श्रौतस्मार्ताग्निभावेऽदं प्रायश्चित्तं॥
॥२७॥ गृहीतस्याग्नेर्नास्ति स्यादिनापरित्यागो आद्यप्रमादः। मासद्वयं तु यो वह्निं त्यजेदेवं समाचरेत्। नास्ति स्यात्कृच्छ्र
मेकं तु होमद्वयं ददातिचेत्॥ तथा॥ योऽग्निं त्यजति नास्ति स्यात्प्राजापत्यं चरेत्त द्विजः। अन्यत्र पुनराधानमुपदि
ष्टमनीषिभिः। मास चतुष्टयमभिध्याप्याग्निपरित्यागेऽतिकृच्छ्रं॥ तथा च सएव। चतुष्टयेच संपूर्णे मासानां
तु हुताशने॥ स्वस्थातिकृच्छ्रं कुर्वीत ततः पापात्प्रमुच्यते। षण्मासे पर्यंतेपराकः। अतः ऊर्ध्वं अब्दपर्यंतं पयोव्रतं॥
यथाहोशनाः। षण्मासांस्समोऽतेयोऽग्निं पराकं तु समाचरेत्। ऊर्ध्वं पयोव्रतं कुर्यान्मासमेकं समाहितः। वर्षपर्यंत
तमेवाहुर्मनयः शंसितव्रताः। संवत्सरादूर्ध्वं तु स्कंदपुराणे। ऊर्ध्वं संवत्सराद्ग्निं यस्त्यजेत्स पयोव्रतं। द्वैमासिकं त
तः कुर्यात्त्रैमासिकमथापि वा। कालाल्पत्वे बहुत्वापेक्षया विकल्पः। प्रमादात्मासमग्निपरित्यागेऽपि। स्कंदपुरा
णे। हुताशनं हि यो विप्रः प्रमादात्त्यजति प्रभो। प्राणायामशतं कुर्यादुपवासमथापि वा। प्राणायामशतं त्रिरात्रप
रित्यागे। कूर्मपुराणे। षड्रात्रं त्यजेदग्निं प्रमादाद्यस्तु मे प्रभो। उपवासं ततः कुर्यात्प्राजापत्यमथापि वा। तथैस २४
तेनन तत्प्रसक्तं त्रिरात्रे परामृश्यते॥ मासद्वयमग्निपरित्यागे त्रिरात्रं। अतऊर्ध्वं संवत्सरपर्यंतं मासे मासे प्रजा

पत्यं। अत ऊर्द्धं कालबहुत्वे प्रायश्चित्तबहुत्वं। तथा च भरद्वाजागस्त्ये। प्राणायामशतमा त्रिरात्रमुपवासः
स्याहाविं। ८ क्रांतिरात्राद् तत ऊर्द्ध्वं माषषिरात्रैति त्रिरात्रीरुपवसेत्। अत ऊर्द्ध्वं मासं संवत्सरात्प्राजापत्यं चरेत्।
अत ऊर्द्ध्वं कालबहुत्वे इत्युपवासश्च त्रिरात्रात्स्यपि पादः। आलस्ये न परित्यागे स्वसंततरे। आलस्येन यदा
वह्निं द्वादशाहं त्यजेत्स्म भो। त्रिरात्रमुपवासं च चरेत्स्य पापविमुक्तये। यदा त्वालस्यादिना त्यागे नैव विशेषकृते। भारद्वा
जगृहे द्वादशाहातिक्रमे त्र्यहमुपवसेत्। मासातिक्रमे द्वादशाहमुपवासः। संवत्सरातिक्रमे मासोपवासः। पयोभक्ष
णं वा॥ कूष्मांडीभिर्होमः क्रमेणोभयं चेति। उपवासासमर्थस्य मासं पयोभक्षणं। संवत्सरानंतरं अधिककालातिक्र
मे तु भयं। एतं च गत्यग्निविषयं। हारीतः। संवत्सरमुत्सन्ने अग्निहोत्रे चांद्रायणं कृत्वा पुनरादध्यात्। द्विवर्षोत्सन्ने चां
द्रायणं सोमायनं च कुर्यात्। त्रिवर्षोत्सन्ने संवत्सरं कृच्छ्रमभ्यस्य पुनरादध्यादिति। शंखः। अग्न्युत्सादी संवत्सरं
प्राजापत्यं चरेत्कृच्छ्रं चरेद्द्यादिति। एतदकामतः। श्रौताग्न्युत्सादे। कामतस्तु मनूक्तं। अग्निहोत्रमपविध्येद्ब्राह्मणः का
मकारतः॥ चांद्रायणं चरेन्मासं वीरहत्यासमं हि तदिति। मासमग्निहोत्रमपविध्येदित्यन्वयः। केचनालस्यादिना मा

देव०२५ सपरित्यागे प्रथममासे कृच्छ्रत्रयं। ततो मासमध्ये एवं यावत्कृच्छ्रसंख्येति। एवमाहृयो गुरुलघुकल्पाः शक्त्यपेक्षया व्यवस्थाप
॥२५॥ नीयाः। एवं प्रायश्चित्तानंतरं प्राप्तस्थले पुनराधानं कृत्वा नित्यकर्म कुर्यात्। प्रायश्चित्तं च होमद्रव्यं दत्वा। तथा भारद्वाजगृ
ह्ये। यावत्कालमहोमी स्यात्तावत्द्रव्यमशेषतः। तद्दानं चैव विप्रेभ्यो यथा होमस्तथैव तद्धि इति। संध्यामिष्टिं चरुं होमं
यावज्जीवं समाचरेत्। न त्यजेत्सूतके वापि त्यजन्गच्छेदधो द्विजः। कुर्यात्पंचमहायज्ञान्नित्यशः सूतकं विना। नित्यं
नैमित्तिकं चान्यत्तु कर्मापि न हापयेत्। स्वकर्महानौ पतनं न सर्वे नैव त्वनापदि॥ स्वकर्महानौ नास्ति न्यान्मासेन पतनं
स्मृतं। द्वादशाब्दव्रते नैव शुद्धिस्तस्य तु नान्यथा। नेनिरिक्षाकर्मी क्षेत तस्य शौल्काया पात्यश्चैलकं। तेन न संभाषणं हास्य
कुर्वन्नेवैन तत्समः। तदन्नभुक्तो स घस्कस हशय्यासनेषु च॥३॥ ॥तृतीया कंडिका॥ ॥अथ प्रकृतमभिधीयते। गा
र्हपत्येनुगते भस्मनारण्योः समारोपमंथनं कर्तव्यमित्युक्तं। तत्र मंथने क्रियमाणे समारूढोनुगतो वा गार्हपत्यो
मथ्यमानो यदि बहुरणकालात्प्राद्रु॰जायते तदा तत्रत्य स्थितो यमग्निं लौकिके संनिहितं पश्येत्तमानीय गार्हप ॥२५॥
त्यस्थाने स्थापयित्वा तत एवाहवनीयदक्षिणाग्नी विहृत्य तस्मिन्विहारेग्निहोत्रं हुत्वा होमांते गार्हपत्यं मथित्वा

स्वस्थाने स्थापयेत्। जन्मकालसंभावनायां तु मथित्वैवाग्निहोत्रं जुहुयात्। अत्रापि लौकिकाग्निषु गार्हपत्यस्यो
पशमे आहवनीयजागरणे चेत्यादि माध्यवित्तं। ग्राम्याध्वर्यवो। शान्तौ पुनर्विहरणं। सर्वे पांशान्तौ पुनर्लौकिकाग्नेः
स्थापनादि॥ होमारंभानंतरमग्निहोत्र आसन्नेषु चेत्यादि। पक्षहोमं कृत्वा समारूढस्य होमकाले मंथनक्रियज
ननाशंकायां मथ्यमानश्चेन्न जायेत यमहूरादिस्येष एव विधिर्भवति। तथा च मंडनः अरण्योरोपितोप्यग्निर्मथ्य
मानो न स्योद्भवेत्। तत्रापि नितिरैवैषा कर्तुर्युक्ता मनीषिभिरिति। तथा। अरण्यारोपितस्याग्नेर्मथनाशक्तौप
क्षांतेरमाह स एव अरण्यारोपितस्याग्नेः पक्षांतरमपीच्छति। बौधायनोन शक्यं चेन्मथने वापि धारणं। लौकि
के वह्निमादीप्य विन्दत्याग्न्योस्तु मध्यतः। आरोपितारणी क्षिप्त्या जुहुयादग्निहोत्रकं। मंथनं धारणं चाग्नेयावि
त्कालेन संभवेत्। तावत्कालं जुहोत्येवं संवनि। पवसथ्यतः। अथवा मथ्यमानस्य गार्हपत्यस्याजनने लौकिका
ग्नेरभावे त्रपाणामग्निनां स्थाने कैकं ब्राह्मणं स्थापयित्वा परिस्तरण पर्युक्षणाद्युपस्थानांतं सांगमग्निहोत्रं
ब्राह्मणानां दक्षिणहस्ते जुहोति। इयांस्तु विशेषः। होमात्पूर्वं यत्समिधाहरानंतदत्र न भवति तस्यैधनार्थत्वा

देव २५ तत्स्य चात्रासंभवात्॥ समिद्वतीस्येतत्समिदाधानमत्रापि भवत्येवाऽदृष्टार्थत्वात्॥ तत्र समिद्वत्सु समिद्धोमे ब्रा
॥२६॥ ह्मणहस्तदीदिहि समेद्धा ते ब्राह्मणहस्तदीघासमिति मंत्रे ऊहः। एकस्मिन्नेव विप्रहस्ते एकस्थानस्थे सर्वे होमा हो
तव्याः। द्रव्यसंस्कारस्य लौकिकाग्निना कार्य इति याज्ञिकाः। ब्राह्मणाश्च प्रत्यङ्मुखा इति धर्त्तिस्वामिनः। अग्निसा
ध्यानां प्रतपनाधिश्रयणादीनामभावो पि ब्राह्मणहस्ताद्विविधिबलात्। अस्मिन्पक्षे मासं वा सार्धमागतस्य
ब्राह्मणस्य यावज्जीवं निराकरणं न कर्त्तव्यं। संवत्सरपर्यंतमिति पितृभूतिः। ब्राह्मणानामसंभवे दक्षिणेष्व
जकर्णेष्वग्निहोत्रं होतव्यं। अत्र सर्वेष्वग्निस्थानेष्वेकैकमजं स्थापयित्वा तेषां दक्षिणकर्णेषु परिस्तरणा
द्युपस्थानांतमग्निहोत्रं होतव्यं। तत्र समिद्वत्सु समिद्धोमे अजकर्णदीदिहि समेद्धा तेऽजकर्णदीधासमिति प्रा०प्र०२
उत्तरसमिदाधानमंत्रे विशेषः। अस्मिन्पक्षे यजमानो यावज्जीवं संवत्सरं वाऽजमांसं नाश्नीयात्। अज ॥२६॥
स्यागप्राप्तस्य मांसभोजनस्य प्रति[illegible]धो नः। क्रत्वर्थस्येडादिभक्षस्य। अजः प्रत्यङ्मुखो वस्थाप्य इति धर्त्त
स्वामिनः॥ यस्य कर्णे हुतं तस्यैव व्यक्तिविशेषस्य मांसं नाश्नीयादिति वासुदेवः। अजाऽसंभवे कु

इस्तंबेषु कारेर बल्केकं कुशस्तंबं निधाय तस्मिन्नग्निहोत्रं जुहुयात्॥ समिद सि समिद्धोमे कुशस्तंबे दीदि
समेद्धाते कुशस्तंबर्हीघासमिति मंत्रे विशेषः। अस्मिन्पक्षे अतः अभ्युपवेधं स्वार्थं कुशेषु प्रवेशनं न कर्तव्यं। क
त्वर्थस्य तु न निषेध इति धूर्तस्वामिनः। एतेन श्राद्धादावुपवेशनमर्थान्निषिद्धं भवतीत्याशिकाः। कुशस्तंबाभा
वेऽप्स्वग्निहोत्रं जुहुयात्। अत्र सर्वं गार्हपत्यस्थाने अपःपात्रस्था निधाय ततः आहवनीयदक्षिणाग्निस्थाने पा
त्रांतरेणाविच्छिन्नस्य परिस्तरणादि सांगमग्निहोत्रं जुहुयात्॥ अत्र समिद सि समिद्धोमे आपो हीदिहि समिद्धाते आ
पो हीघासमिति विशेषः॥ एवं सूर्याभ्यभे उत्तरोत्तरहोमाधिकरमिति वासुदेवः। अस्मिन्पक्षे यजमानेन याव
ज्जीवमपां निदानं कर्त्तव्या॥ याप्सु हुतेन तासां निदानं कार्येति वासुदेवः। सर्वेषु पक्षेषु होमांते गार्हपत्यस्य मं
थनं कार्यं तथा चापस्तंबः। यदि कालसन्निकर्षेऽग्निमथ्यमानो न जायेत तत्रान्यं यं पश्येत्तमादृत्य जुहुयाद
थ त्वरमाणस्तु निर्मथेद्यद्यन्यं न विंदेदजाया दक्षिणे कर्णे होतव्यमजस्य तु नागो न ततो नाश्रीयाद्यद्यजो न
विंदेत् ब्राह्मणस्य दक्षिणहस्ते होतव्यं ब्राह्मणं तु वसत्यै नाव रुंधीत यदि ब्राह्मणं न विंदेद्दर्भस्तंबे होत

दे॰ब॰२५ कंदर्भेनाध्यासीतयदिदर्भान्नविंदेदप्सुहोतव्यमापस्तु नपरिचक्षीतेमाभोजनीयाइमाऽअभोजनीयाइत्य
॥२७॥ पिभोजनीयाऽअभिरिक्तपादेनप्रक्षालयीतसांवत्सरिकाण्येतानिव्रतानीत्याश्मरथ्योयावज्जीवमित्या
लेखनइति। अनुद्धृताभिःपादप्रक्षालनेनकार्ये॥उद्धृताभिर्ननिषेधइतितन्त्राब्धे॥अपराग्न्योर्होमपक्षे
तत्रापिस्थापयेदग्निं।होमश्वंकर्णेकर्तव्योव्रतमप्यतत्रवक्ष्यते।अन्नस्यमांसेनाश्नीयाद्वैधवर्जमनाहु
तो।पाणिहोमेनावरुंध्यात्।ब्राह्मणंवासकांक्षिणं।दर्भासनेपुनासीतदर्भेहोमेपुवक्ष्यतेआपोन
निधात्ताभिश्चपादेनक्षालयीतवेनिनैत्तिरिकाणिकार्या।आश्वलायनस्तूत्रे।अग्निहोत्रायकाले्ग्नाव
जायमानेप्यनयमानीयजुहुयुः।दर्वालाभतुत्तरोत्तरंब्राह्मणपाण्यजकर्णदर्भस्तंबाप्सुकाष्ठेषुपृथि
व्यांहुत्वात्वरयामंथनंपाणौचहुतासनवस्त्ररोधःकर्णेचन्मासवर्जनेस्तंबेचेन्नाधिशयीताप्सुचेदविवेक
एतत्सांवत्सरिकंयावज्जीविकंचेति॥ ॥अहुतेग्निहोत्रेसूर्योदयेजातेहोमार्थंचगृहीतमुन्नीयाहवनी ।१५८
यस।मीपेआतमनोमरणावस्थापर्यंतंश्वासधारणंकृत्वोपविशेत्।ततःसर्वामाहुतिंहुत्वाभूरित्यस्या

अनुमंत्रणं कुर्यात्। ततः क्षीरहोत्रेव वरं दद्यात्। स्वयं होमे त्वन्यस्मै सन्निहिताय चरुत्राद्वेनाभिलषितं सार
भूतं द्रव्यमुच्यते। ततउत्तराहुतिप्रभृति शेषं समापयेत्। अथाहवनीयहोमात्प्रागुदये त्रयाणां होमानां सा
धारणमिदमेकं नैमित्तिकं। लत्र्वहुते गार्हपत्य दक्षिणाग्निहोमात्प्रागुदये त्वै तद्देवद्वयोः साधारणं नैमित्तिकं।
दक्षिणाग्निहोमात्प्राक् चेदभ्युदय स्तदा तदर्थमिदं नैमित्तिकमिति याज्ञिकाः। दक्षिणाग्निर्विहारात्प्रागुद
येऽस्तमयेऽस्तमयेऽपि वा। नयोर्थथाहितेः प्राग्वा भवन्। दः प्राग्यहोदयः॥ कृत्वा नादिष्टमेतानि कर्त्तव्यानि य
थाययमिति कारिकाकारो गार्हपत्य दक्षिणाग्निहोमात्प्रागुदये नादिष्टहोममुक्तवान् शांखायन सूत्र
भाष्यकारोपि। अहुताभ्युदिते इदमेव प्रायश्चित्तमुक्तवान्। निवृत्ते आहवनीये होमे ऽभ्युदये सर्वप्राय
श्चित्तमेव विशेषप्रायश्चित्तस्यावचनादित्याह। अथाग्निहोत्रप्रतिपादार्थमयथाकरणे प्रायश्चि
त्तान्यभिधीयंते। तत्र संचरप्रवेशाकरणे स्वीकृतान्यसंचरेण प्रवेशे चाध्वर्यवं हुत्वा यथाविहितं प्रवेशः
कर्त्तव्यः भागंस्य पर्युक्षणात्। प्रवेशानंतरं यजमानस्य स्वच्छानेऽप्रवेशनाचमनाकरणे चाध्वर्यवहोम

देव॰ २९ सर्वंतस्यकरणंप्रागेत्यपर्युक्षणात्। कूर्चासादनाहीनोपदार्थानामकरणेचसर्वत्राध्वर्यवहोमोभवति। अ
॥२८॥ ध्वर्यवशब्देनदक्षिणाग्नौभुवइतिचतुर्गृहीतहोमः त्वंन्नइत्याद्याहुतिपंचकस्यसकृद्गृहीतेनाहवनीयेहो
मइत्येताबदुच्यते। कूर्चासादनमकृत्वेप्राकृतत्रचस्रुगासादनात्कार्यं। परिस्तरणंप्राकृतचत्रैतेहोमात्। पर्यु
क्षणेचैवं। दोहनमेषः प्राग्वद्दृष्ट्याहरणात्। अधिश्रयणादयः पयसः संस्कारः प्राक्दक्षिणाग्निहोमात्।
उद्वासितेपयस्फदकासेकोनभवति। सर्वंसमिदाधानंप्रागुत्तराहुतेः। होमाद्दूर्ध्वंस्रुचस्यनाशदोषादा
वाध्वर्यवमेव॥ नोत्सादनेद्रव्यस्यभक्षाद्दीनोलोपः। अपराग्निहोमेअकृतेस्थालीस्रुचस्यद्रव्यस्यनाश
दोषादोषसर्वंवदन्यत्तज्जातीयमेस्कृत्यतेनापराग्न्योर्होमः कार्यः। द्विःप्रकंपननिमार्जनेप्राकुभक्षात्।
उर्ध्वंचाध्वर्यवमेव। अनामिकायाद्विःप्राशनाहीनामकरणेन्यथाकरणेचशेषसम्भावेयावत्। देवांजि
न्वेत्यादिनिषेकःप्राक्समाप्तेः। प्रतपनसमिदाधानपर्युक्षणोपस्थानान्यासमाप्तेः। आध्वर्यवहुत्वाकर ॥२
णमितिसर्वत्रस्तेयेग्रेषगोरवभयात्पुनःपुनर्नलिख्यते। व्रतविसर्गातीत्यनिःक्रमयेप्रागाहवनीयदक्षि

णाग्न्योरुपशमनात्। सभ्यसमीपासनमस्मोहापसमीपोपगमनयोराध्वर्यवहोमपूर्वकं प्रारक्ता
यं होमात्करणं। उक्तावधेरूर्ध्वं सर्वत्राध्वर्यवमेव। न तस्य पदार्थस्य करणं। इति अग्निहोत्रमेमतिपदार्थ
प्रायश्चित्तं॥ ॥अथ दर्शपूर्णमासयोः प्रतिपदार्थप्रायश्चित्तान्यभिधीयंते। अकरणेऽन्यथाकरणे चा
ध्वर्यवं हुत्वा तस्य करणमिति सर्वत्रानुक्तमपि ज्ञेयं। तत्राहवनीयदक्षिणाग्न्योरनुद्धरणे उद्धृतयोर्वा प्रागन्वा
धानादुपशमे आध्वर्यहोमार्थं दक्षिणाग्निमाहवनीयं चोद्धृत्याध्वर्यवं हुत्वा इष्ट्यर्थमाहवनीयदक्षिणाग्न्यो
रुद्धरणं कुर्यात्। अग्न्यन्वाधानस्य सर्वेष्वग्निषु आगंतव्यहोमात्। अग्न्यन्वाधानोत्तरकालमग्न्यनुगमने
तु उक्तं। वपने स्वीकृते शाकूर्मापवर्गात्। सर्वत्रावधेरूर्ध्वमाध्वर्यवमात्रं भवति। सामर्थ्ये सति व्रतोपायनीय
स्याभोजने पि प्रागस्तमयाद्भोजनेनरात्रौ। न द्वितीयेऽह्नि। माषमसूरमधुपरान्नक्रोधाहंकारभयं विषा
दकार्पण्यपल्योभाहीनोपजनमानेन वर्जनाकरणे स्मार्त्तं। श्रुत्युक्ताकरणे श्रौतं। स्वीकृतकाले व्रतग्रहणस्या
करणेप्येवं प्राग्विसर्गात्। आध्वर्यवं पदार्थकालेऽसत्यभाषणे श्रौतं आध्वर्यवं होतुः पदार्थानुष्ठानकाले

देव॰२५ हौत्रकं ॥ अवधारितहस्यारण्योषधीनामाभक्षणे अन्यत्र रागाराशयने चाध्वर्यवं ॥ अहपक्षे स्वी
॥२७॥ कृते पौर्णमास्यामनारंभे आध्वर्यवपूर्वकं प्रतिपदि कर्त्तव्यं । ब्रह्मवरणं प्राक्समाप्तेः । कृतजपईक्षणा
द्यासनसंस्कारः प्रागुपवेशनात् । उपवेशनमासमाप्तेः ॥ प्रणीताप्रणयनं सर्वार्थपक्षे प्रागेतस्य कार्यात् ।
संयवनार्थत्वपक्षे प्राक्संयवनात् । अदृष्टार्थत्वपक्षे प्राग्विमोकात् । सर्वमचमंत्ररहितपदार्थकरणे आ
ध्वर्यवमात्रेन पदार्थस्यावृत्तिः । भूतस्त्वेत्यालंभः प्राग्विमोकात् । यजमानस्य वाग्यमनाकरणे प्राग्घविःकृ
दाह्वानात् । अपचारे आध्वर्यवं परिस्तरणपात्रसूत्र तत्रोत्यहोमात् । पुरस्तात्रयममित्यस्याऽकरणे श्रौ
ते । अन्यदिक्षु त्वन्यथाकरणे स्मार्त्ते । पात्राणामासादनं प्राक् तस्याप्रयोजनात् । भूपग्निहोत्रहवण्योरादा
नं प्राङ्गुर्वीपात् । तयोर्मध्ये एकस्यादानविस्मरणे कर्मणे वामितिमंत्रेण तस्यैकस्यादानं ॥ अध्वर्योर्वाग्यम
नं प्राग्घविःकृतः । विसर्गे श्रेछिद्रणा विस्मवितिप्राकरणिकस्य वैष्णवमंत्रस्य जपः ॥ स्फ्योपहितपात्रीक
रणं प्राग्ग्रहणात् । ध्रुरसीत्यादीनि यजुंनामित्यंतानि प्राग्ग्रहणात् हविषईक्षणालंभने प्राप्त्यागात् । निर्वा

पः प्रागधिश्रयणात्। ज्ञेषाभिमर्शनं प्राग्धविर्यागात्। प्राङ्गीक्षणादिसादनं। तस्याऽकरणेऽन्यथाकर
णे चाध्वर्यवं। स्कंदने तूक्तं। पवित्रकरणमामार्जनात्। प्रोक्षणीसंस्कारा आमूलावसेकात्। स्कंदने आ
ध्वर्यवं। नाशा हो पुनरुत्पत्तिः। हविः प्रोक्षणं प्राग्यागात्। पत्राणां प्रोक्षणमातत्तत्पात्रप्रयोजनात्। प्रैषाक
रणेऽध्वर्यवमात्रं कुकुटाहननं प्राक्समासेः। केंदुनादि कणानिधानांतमोपेषणात्। उपवेषादानं प्राग
भ्यूहनात्। अंगाराणामुदूहनमोत्सकपालोपधानात्। आरेवयजमित्यंगाराहरणं प्राक्प्रथमकपालो
पधानात्। ऊर्ध्वं त्वाध्वर्यवमेव। सव्यांगुल्याश्रन्येंगारनिधानं प्रागधिश्रयणात्। एकद्विबहुकपालानां
मनुपधाने प्रागधिश्रयणात्तेषामुपधानं। पंचमकपालादीनां प्राग्दक्षिण्योपचारे स्मार्त्ते। अभ्यूहनं प्राक्पु
रोडाशाधिश्रयणात्। उपर्जन्यधिश्रयणं प्राक्संयवनात्। कृष्णाजिनादानादीनामुपलोपधानांतानां प्राक्पे
षणात्। प्रेषणं प्राहणं चापान्यामावपनात्। ईक्षणं प्राग्यागात्। पात्र्यामावपनं पवित्राभ्यामुपसर्जनीग्रह
णमासंयवनात्। नस्र प्रागधिश्रयणात्। सर्पे पवित्रतापवित्राभ्यां प्रतिग्रहणस्य चाकरणे वाध्वर्यमात्रं। विभ

हेव॰२५ ज्यालेभः प्राग्याग्यात्। आज्यनिर्वापः प्रागंस्याज्यकार्यात्। वेदबंधः प्राग्विमोकात्। आज्यपुरोडाशाधिश्रयणंप्राग्या
॥३०॥ गात्। आज्यंप्रागंस्यादुद्धृतेः। यौगपद्याकरणे आर्द्धपवमात्रे॥ प्रथनाद्भिरभिमर्शने चाऽश्रपणात्। पाव्यंगुलिप्रक्षाल
नादिश्टतानिवासनौतानां प्राक्स्वस्वप्रयोजनात्। अभिवासनमुद्वासनात्प्राक्। अभितप्यास्पोदकनिनयनमास
मासेः। इध्मस्यनाशाद्दोषाद्दावाध्वर्यत्वमात्रे। इध्मसुन्माद्यनिनयेदिति केचित्। वेदिमानमासर्वपरिग्रहात्॥ परिसमु
हनं प्राक्स्तरणात्। उत्करकरणं च। सत्रणावज्राहाने प्राक्तूष्णीं चतुर्थमिस्येनस्मात्। एकस्य तृणस्याहानविस्मर
णे मंत्रवर्ज्जमाहानं। आलेभः प्राक्स्तंबयजुषः। तृणनिधानं चाचतुर्थप्रहरणात्। तृणस्योदगग्रतापचारे अध्वर्य
ये॥ लेखाकरणहरणसमर्शनानिप्राक्स्तरणात्। हरणप्रैषः प्राग्धरणात्। खननं परिग्रहश्च प्राक्स्तर
णात्। अनुमार्जनं च प्रैषाः। प्राक्करयोर्य करणात्॥ स्फ्योरक्प्रहरणमासमासेः। प्रोक्षणीआसादनमोत्सवना प्रा॰प्र॰२
त्। इध्मासादनं प्रागिध्माधानात्॥ बर्हिरासादने आस्तरणात्। स्रुवजुहूसंमार्गआकर्मापवर्गात्। उपभृतआ ॥३
सेस्रवहोमात्। ध्रुवाया आसमिष्टयजुषः॥ प्राशित्रादीनामातत्तत्कार्यात्। संमार्जनानां प्रासनमासमासेः।

पत्नींसंनहनमाविमोकात्।आज्याद्यासनमोत्सवनात्।ईक्षणमाकर्मापवर्गाहृतेः।वेद्यामासादनंप्रागुत्सवनात्॥उत्स

वनावेक्षणेमाकर्मापवर्गाहृतेः।प्रोक्षण्युत्सवनमामूलोपसेकात्।आज्यग्रहणमातयोजनात्।इध्मप्रोक्षणंप्रागिध्माधा

नात्।वेदिप्रोक्षणमास्तरणात्।वर्हिषःप्रोक्षणमासमिष्टयजुर्होमात्।मूलावसेचनंच।पवित्रयोजनांते।प्रणीतासु

निधानमाप्रतिपत्तेः।वर्हिर्विस्रंसनंप्रस्तरग्रहणंचप्रागेत्समुष्टिस्तरणात्।संनहन्विस्रंसनाद्यवत्सादनांतमाव

र्हिर्होमात्।वेदिस्तरणमासमिष्टयजुषः।प्रस्तरग्रहणेविस्मृतेवर्हिर्विस्तृतायांस्मरणे आध्वर्यवहुत्वायजमानेवा

चंयच्छेतिप्रैषः।प्रस्तरमात्रवर्हिषःसादनं।पूर्वाभ्यासेवपवित्राभ्यांप्रोक्षणीसंस्कारः।दैव्यायेतिप्रोक्षणं॥अध्वधिवे

दि-अग्नीधः प्रोक्षणीनांधारणं॥प्रोक्षणीरासादयवर्हिरुपसादयेतिप्रैषः।प्रोक्षणीनांवेद्यामासादनमग्नीधः॥

प्रणीता-अपरेणप्रस्तरमात्रवर्हिष-आदनं।प्रोक्षणीनांस्तविनुर्वइस्फसवने॥वर्हिषःप्रतिग्रहणं।वेद्यासादनंब्र

ह्मणानवर्हिःप्रोक्षिष्यामीतिप्रैषः।स्कचेत्वेतिप्रोक्षणं।मूलावसेकः॥ऊर्ध्वंप्रस्तरग्रहणं।ब्रह्मणेसमर्पणं।

प्रस्तरादानकालेस्मरणेनभवति।ततःप्राग्भवति।समिद्राधानंप्रागुत्स्पर्शनात्।मूलोपसेचनात्माकप्रोक्षणी

हैव०२५ ङोऽस्यनाघहोघाहौपुनरुत्पाद्यमन्त्रलोपसेचनेकार्यंमन्त्रलसंस्कारत्वात्।प्रस्तरान्स्यादानेप्राक्तरणात्।आह
॥३१॥ वनीयकल्पनेप्राक्कर्मापवर्गाहुतेः।उल्मुकोदूहनेप्रागंत्यानुयाजात्।परिधिपरिधानमाकर्मापवर्गाहुतेः।परि
धिनाशहोमादौसंस्कारेरुत्पाद्यपुनःपरिधानं।प्रथमपरिध्युपस्पर्शनमापरिधिप्रक्षेपात्।समिदाधानोत्त
रकालेकाष्ठेनरेणाप्युपस्पर्शनंकार्यंपरिधिसंस्कारात्।स्रुक्स्पानुपस्रुवयोराधानमासमिष्टयजुहुषः।आह
वनीयेक्षणंचा।विधृत्योःस्तरणमाप्रस्तरणात्।सव्यभ्रुन्यकरणंचाऽऽज्यहोमासादनात्।जुहूमासादनमाव्यू
हनात्।उपभृतश्च।आसमिष्टयजुषोऽध्रुवायाः।विभस्मीकरणमोद्वासनात्।पात्रोपस्तरणं आहविर्निधाना
त्॥शृताभिघारणआयागात्।प्राणदानेच।कपालोऽञ्जनमोद्वासनात्।उद्वासनमाकर्मसमाप्तेः।कपालनाशो
वक्ष्यते।हविषामासादने प्राग्यागात्।आलंभनेच॥आत्मालंभनमासमाप्तेः।होतृषदनकरणमंत्यात्पत्नी
संयाजात्।सामिधेनीप्रैषसंतन्वन्निनिप्रैषावाल्येससामिधेनीप्रक्षेपात्।अवबाधनमासमाप्तेः।इध्माधा ॥३१
नमासमिष्टयजुषः।प्रतिप्रणवमाधानाऽकरणेनादिष्टमेव।अनुयाजार्थेकाष्ठस्थापनविस्मरणेऽस्येन्व

एकस्यद्वयोर्बहूनांवापुनरासादनापवित्रेचेत्प्रस्तरेकृनेततःपवित्रछेदनपवित्राणांचसादनंहूर्वेणैवेध्मसं
नहनेनबध्येध्मस्यासादनं।सर्वाभ्यामेवपवित्राभ्यांपुनःप्रोक्षणीसंस्कारः।दैव्यायेतिप्रोक्षणं।पवित्रप्रति
पत्तेरूर्द्ध्वंतयोरपिछेदनं।प्रोक्षणीनामध्यधिवेदिंधारणमग्नीधः।अध्वर्योःस्फ्यमुद्यम्यप्रोक्षणीरासाद
येध्ममुपसादयेतिप्रेषः।अतवेदिप्रोक्षणीनामासाधेदनं।प्रणीतानांपश्चादिध्मस्यासादनं।प्रोक्षणीउत्प
वनंसवितुर्वइतिब्रह्मन्निध्ममितिप्रेषः।अनुज्ञातस्यकुत्मोमीतिप्रोक्षणं।ततोयथार्थंविनियोगः।अनुया
जाहूर्ध्वमेवमेवा।नत्विध्मसंस्कारः।उपवाजनमासमिष्टयजुषः।।स्रुग्धारआसमाप्तेः।।संमार्गआग्नेःस्रुहुतेः।
संमार्गेप्राक्दक्षिणापचारेस्मार्त्तं।।अंजलिकरणमोत्तराधारहोमात्।पाणिभ्यांजुहुमित्यादिदक्षिणेनैव
रक्षानांनानामनादिष्टमात्रे।उत्तराघारआसमाप्तेः।स्रुच्याधकरणेअनादिष्टे।द्रव्यनाशादौसकृद्गृहीतेनो
त्तराधारः।ध्रुवासमंजनमाप्रथमप्रयाजात्।इध्मसंनहनादानमाहोत्तनामग्रहणात्।आश्रावणादिहोम
नामग्रहणात्मोत्स्यपत्नीसंयाजात्।संमृष्टयोरुपवेशनमास्रुगादापनात्।येयजामहादीनांयाज्याचवषट्का

दे ॥

रांता नामकरणे अन्यथाकरणे च होत्रकं। देवतोद्देशेन द्रव्यत्यागाकरणे पुनर्द्रव्यमुत्पाद्य यागः। प्रयाजाज्यसमा
सेः। एकैकस्याकरणे च। समानयनविस्मरणे जौहवेनैव सर्वेषां इष्टं पुनः शेषभक्तेन चतुर्थपंचमयोर्यागः। शेषे
पाहविषामभिधारणे प्रागाज्यभागार्थं आज्यग्रहणात्। नाशदोषादावनादिष्टमात्रं। आज्यभागादीनां स्विष्ट
कृदंतानामासमाप्तेः। अनुवाचनादिवषट्कारांतेप्राग्यागात्। देवतादिविपर्यासे वृश्चने। अवत्तस्य नाशदोषादौ
स्तनिपातिके रंगे युक्ते हविरंतरमुत्पाद्य तेन यागः। प्रधानयागात् पूर्वं विनाशे आज्येन स्विष्टकृत्। प्राशित्रादीनां
पः। उपभृद्याजस्य विस्मृतौ समिष्टयजुषः पूर्वं स्मरणे प्रकृते समाप्यो ऽरि। तत्रारम्भकर्मापवर्गांतिमाज्यहविः
कर्मावर्तने विहितस्थाने शुहोमाकरणे अयथाकरणे चा ऽनादिष्टमात्रं। नावृत्तिः। अनुब्रूहास्कृतोना पव्याह
रेदित्यादिषु पव्याहरणे भूर्भुवः स्वरिति वाजपेन। पुनरनुवाचनादि वा कुर्यात्। स्रुग्विधानाकरणे ऽनादिष्टं। सेच
राभ्यक्षस्य पामोत्त्यानुयाज्यत्। प्राशित्रेडादिमार्जनांतमासमाप्तेः। प्राशित्रेडावदानादिमाचतुर्धाकरणात्। ॥२४॥
मदानादिनाभ्यात्मभनांतमासमाप्तेः। ईक्षणग्रहणसादनान्याभक्षात्। इडासमवदानादिभागसमर्पणांतमा

भस्मान्तात्। जपश्चा समाप्तेः। भस्मोमार्जने च। पवित्रप्रतिपत्तिः प्रस्तरहोमात्। नाशदोषाद्वनादिश्च मे वा। भा
गपरिहरणमा समाप्तेः। अन्वाहार्याभिधारणाद्यालंभनान्तं प्राग्दानात्। दानेत्वा समाप्तेः। उल्मुकसमासश्चा
संत्यानुप्रयाजान्तात्। प्रैषश्च॥ समिदाधानसंमार्गौ प्राक्समिष्टयजुषः॥ अनुयाजाश्चा समाप्तेः। समानयनवि
स्मरणे जुहूरोपेण ध्रुवेण वा कृतानामनुयाजानामावृत्तिः॥ स्रुग्विपर्यासेनादिश्चमाचमेवाधारानुयाजश्चा
समाप्तेः। व्यूहने च। अनुयाजार्थस्य द्रव्यस्य नाशदोषाद्धो वह्यपते। जुह्वा अभ्यक्षणमा समाप्तेः। परिधिं जनमा
प्रक्षेपात्। परिधिग्रहणादि प्राक्सूक्तवाकात्॥ प्रस्तराहाननादीनि नीचैर्हरणान्तान्या प्रस्तरहोमात्। विधृत्योः
स्थाने करणमा बर्हिर्होमात्। प्रस्तरहोमश्चा समाप्तेः। तृणप्रक्षेपात्मालंभौ चापरस्परसंवादश्चांशयोर्वा का
त्। अंशयोर्वा कश्चा समाप्तेः। परिधिप्रक्षेपश्च। प्राक्पत्नीसंयाजार्थस्य प्रहरणात्संस्रवाहुतिः। धुरि निधान
मा समाप्तेः। वेद्यालंभश्चा समिष्टयजुषः॥ पत्नीसंयाजाश्चा समाप्तेः। अस्यान्तसंचरेण प्रवेशनमोऽस्य पत्नीसं
याजात्। इडादि मस्रोतमा समाप्तेः। अरद्धाकुतिः प्रागदक्षिणाग्निहोमार्थीज्यग्रहणात्। द्रव्यनाशादौ सक

हव०२५ गृहीतेन जुहुयात् । सव्येनाज्यस्यास्याकरणे आध्वर्यवमेव । दक्षिणाग्निहोम आसमाप्तेः । वेदयोः कृविम
॥१२३॥ कादिस्तरणांतसमाप्तेः । समिद्धस्य स्रुवस्य । ध्रौवस्य नाशादौ प्राशे संस्कृत्य होतेन ॥ बर्हिर्होममन्त्रासमाप्तेः । प्रणीता
निनयने तोउदकाभावेनादिष्टमेव कृष्णापासनमासमाप्तेः । कृष्णाजिनमधोधः कृष्णापासनाकरणे त्वा-
त्वाध्वर्यवम् वमेव । पूर्णपात्रनिनयनमासमाप्तेः । विष्णुक्रमणादाधा हवनीयोपस्थानांतस्याकरणेप्य-
वमेव ॥ भागस्य नाशादौ कादाचाध्वर्यवमेव । आवर्त्तनप्रादक्षिण्याकरणे अध्वर्यवं । न तु स्मात्तप्रैषेविना
प्रैषार्थे च कृते चाध्वर्यवमेव । कर्मापवर्गे समिदाधानादौ च्यग्निमन्त्रावयावदाध्वर्यवपूर्वकं कार्याणि । स-
मिधानाशादौ वाध्वर्यबं हुत्वा सादनादिभिः संस्कारैः संस्कृत्य समिदाधानं कुर्यात् । अवधे दृष्टे स्वर्व-
ध्वर्यवमेव । न तस्य कारणं । मंत्ररहितस्य प्रैषवर्जितस्य करणे चाध्वर्यवमात्रे ॥ ॥ इति दर्शपूर्णमासयोः
प्रतिपदार्थं प्रायश्चित्तानि ॥ ॥ सर्वस्य हविषो नाशे अपहारादिना अदर्शने जाते दोषे श्लेष्माघमेध्यचंडाला- ॥
दिस्पर्शेन हविषो दुष्टत्वे जाते आध्वर्यबहुत्वात दृहारे वास्तो निपातिके रंगौर्विनष्टे हविः कृत्वा घयागः कर्त्त-

[OrderDescription]
,CREATED=06.01.20 10:42
,TRANSFERRED=2020/01/06 at 10:59:45
,PAGES=127
,TYPE=STD
,NAME=S0002450
,Book Name=M-2598-KATYAYAN GRIHSANGRANAM
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF

FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF
,FILE19=00000019.TIF
,FILE20=00000020.TIF
,FILE21=00000021.TIF
,FILE22=00000022.TIF
,FILE23=00000023.TIF

FILE24=00000024.TIF
,FILE25=00000025.TIF
,FILE26=00000026.TIF
,FILE27=00000027.TIF
,FILE28=00000028.TIF
,FILE29=00000029.TIF
,FILE30=00000030.TIF
,FILE31=00000031.TIF
,FILE32=00000032.TIF
,FILE33=00000033.TIF
,FILE34=00000034.TIF
,FILE35=00000035.TIF
,FILE36=00000036.TIF
,FILE37=00000037.TIF
,FILE38=00000038.TIF
,FILE39=00000039.TIF

FILE40=00000040.TIF
,FILE41=00000041.TIF
,FILE42=00000042.TIF
,FILE43=00000043.TIF
,FILE44=00000044.TIF
,FILE45=00000045.TIF
,FILE46=00000046.TIF
,FILE47=00000047.TIF
,FILE48=00000048.TIF
,FILE49=00000049.TIF
,FILE50=00000050.TIF
,FILE51=00000051.TIF
,FILE52=00000052.TIF
,FILE53=00000053.TIF
,FILE54=00000054.TIF
,FILE55=00000055.TIF

FILE56=00000056.TIF
,FILE57=00000057.TIF
,FILE58=00000058.TIF
,FILE59=00000059.TIF
,FILE60=00000060.TIF
,FILE61=00000061.TIF
,FILE62=00000062.TIF
,FILE63=00000063.TIF
,FILE64=00000064.TIF
,FILE65=00000065.TIF
,FILE66=00000066.TIF
,FILE67=00000067.TIF
,FILE68=00000068.TIF
,FILE69=00000069.TIF
,FILE70=00000070.TIF
,FILE71=00000071.TIF

FILE72=00000072.TIF
,FILE73=00000073.TIF
,FILE74=00000074.TIF
,FILE75=00000075.TIF
,FILE76=00000076.TIF
,FILE77=00000077.TIF
,FILE78=00000078.TIF
,FILE79=00000079.TIF
,FILE80=00000080.TIF
,FILE81=00000081.TIF
,FILE82=00000082.TIF
,FILE83=00000083.TIF
,FILE84=00000084.TIF
,FILE85=00000085.TIF
,FILE86=00000086.TIF
,FILE87=00000087.TIF

FILE88=00000088.TIF
,FILE89=00000089.TIF
,FILE90=00000090.TIF
,FILE91=00000091.TIF
,FILE92=00000092.TIF
,FILE93=00000093.TIF
,FILE94=00000094.TIF
,FILE95=00000095.TIF
,FILE96=00000096.TIF
,FILE97=00000097.TIF
,FILE98=00000098.TIF
,FILE99=00000099.TIF
,FILE100=00000100.TIF
,FILE101=00000101.TIF
,FILE102=00000102.TIF
,FILE103=00000103.TIF

FILE104=00000104.TIF
,FILE105=00000105.TIF
,FILE106=00000106.TIF
,FILE107=00000107.TIF
,FILE108=00000108.TIF
,FILE109=00000109.TIF
,FILE110=00000110.TIF
,FILE111=00000111.TIF
,FILE112=00000112.TIF
,FILE113=00000113.TIF
,FILE114=00000114.TIF
,FILE115=00000115.TIF
,FILE116=00000116.TIF
,FILE117=00000117.TIF
,FILE118=00000118.TIF
,FILE119=00000119.TIF

FILE120=00000120.TIF
,FILE121=00000121.TIF
,FILE122=00000122.TIF
,FILE123=00000123.TIF
,FILE124=00000124.TIF
,FILE125=00000125.TIF
,FILE126=00000126.TIF
,FILE127=00000127.TIF
,